B1N, स्त्रीर्वा P2, स्त्रियंकृन्यात् comm. u. P2, कर्तसंसर्गे so PaP2 u. wohl auch comm. (*karta* wohl = «spindel», daher) तर्कु° d. i. तर्कु° B5 कर्त्र° M1B1N कत्रं° L कर्तृ° M2, वाऽवशो° nach M1, एवाभि° M2B1 एताभ्यो B5; — c) [die folg. verse sind auch in P1 citirt] नस्तरन्तो P1.2; — d) सुचेतना M1LB5 °तुनः M2; f) अवंत्य° M1L अवंत्यु° M2 अवंत्य° N अवंत° B5 P1 (P2 w. o.; *pāntv*° M1L); — g) [cf RV. 10, 63, 15; der spruch deutet auf historische vorgänge ähnlich wie 2, 13, 6k und verdankt seinen ursprung wohl alten kriegsbewegten wanderzeiten. Wie l. c. zeigen auch hier die mss. zwiefache version: die eine nach RV., die andere selbstandig; ich gebe den text nach der letzteren B5P1.2] वृजने so B5P1.2 वृजने d ubr., स्वर्वतः so B5P2 (cf. Sayana's erklarung) सर्वतः (auch gut, aber wohl aus *svarvatah*) P1, सर्वात (d. i. *sv*° RV., °तिः M2 B1) d. ubr., पथ्याकृतेषु so B5 पथ्यक्° P2 पथ्यतसेषु P1, पुत्रकृथेषु d. ubr.; योनिषु fehlt N, रायो B5, मरुतो (nom. sg viell. fur मा) so alle (सरुतो P2 deutlich wahrnehmbare verschreibung für मरुतो), दधातुनः so alle; — h) °वृणोमके इति M2B1.5, दशाक्रतेन B5 cf. प्रधानस्थाने दशाक्रतं भुक्तयात् P2. — i) ज्ञपत्प्र° P2.

सर्पेभ्यो बिभ्यत् आवपन्तां तूष्णीं भीममेककपालँ अपयिवांक्षतसक्तून्पिष्ट्वा स्वकृत इरिणे दर्भानास्तीर्याज्युताय ध्रुवाय भौमाय स्वाकेति जुहोति । १ ॥ समीची नामासीति पर्यपेक्षुपतिष्ठते प्रतिदिशं द्वाभ्यां मध्ये । २ । अक्षतसक्तूनाँ सर्पबलिँ करोति । ईशानायेत्येके ।

सर्पो ऽसि सर्पाणामधिपतिस्त्वयि सर्वे सर्पाः ।
बलिकारो ऽस्तु सर्पाणां मातिषुर्मा(?) रीरिषुर्मा क्रिँसिषुर्मा दाङुः (?) सर्पाः ॥ a)
मा नो अग्ने विसृजो अघायाविष्यवे रिषये डुकुनायै ।
मा दत्वते दशते मादते नो मा रीषते सहसावन्परादाः ॥ b)
सर्पो ऽसि सर्पाणामधिपतिरन्नेन मनुष्यांस्त्रायसे ऽपूपेन सर्पान् ।
त्वयि सन्तं मयि सन्तं मातिषुर्मा (?) रीरिषुर्मा क्रिँसिषुर्मा दाङुः (?) सर्पाः ॥ c)

" नमो अस्तु सर्पेभ्य इति तिसृभिश्च । ३ ॥ ध्रुवासुं ते पर्यदामीति सर्वामात्यात्रामयाकृमात्मानं

---

16 (cf. WS 23. 29 ff.): [2]) = 2, 11, 8. — [3]) करोति M1, नाशा° (st. īçā°, in comm. u. P2 nicht erwähnt) M2; — a) मातिषुर्मा graphisch ableitbare, aber natürlich fragliche correctur मोस्तुषुर्मा P2 नमोस्तुषुर्मा M1B5 नमोस्तुषुमा L नमोग्रस्तुषुर्मा M2 B1N [cf. sub c); die stelle ist vollig corrumpirt: man hat wohl einen aor. darin zu suchen; *namo 'stu* kann nicht richtig sein und wäre auch nicht entstellt worden], दाङुः [od. दांक्षिषुः ? cf. sub c)] fragliche correctur दाँसि alle; — b) [b) u. c) fehlen in M2B1] वसृजो N (zur bed. v. *visrjo* = *avasrjo* cf. auch 1, 14, 15), अघा° corr. nach RV. अघ्या° L आघा° N आघ्या° M1 विघा° P2 विघ्या° B5, °विक्षवे M1L, डुकु° so N डुत्सु° M1L डुत्स° B5P2, मादत्वते so N मातत्वते B5P2 मदत्वमे M1 माकृत्वते L, दिषते P2, मदेवते (st. मादते) B5, [रिषते corr. Bo.], °मावनपनपरा° B5 °मावनपरा° M1; — c) nach B5 u. P2 zu geben? M1LN weichen in der ersten hälfte wohl unter einfluss von Âçv. Gṛ. 2, 1, 10 folgendermassen ab: सर्पोसि सर्पाणामधिपतिरस्यन्नेन मनुष्यान्त्रायसेपूपेन सर्पान् यज्ञेन देवांस्त्वयि मा संतं मयि संतं etc.; मनुष्यान्त्रा° alle, °त्रायते u. सर्पाः (ohne 2 *asi* u *yajñena devān*) B5P2 [man kann corr. *manushyāñs trāyate* sc. *adhipatiḥ, sarpāḥ* sc. *trāyante, annena — apūpena* «um — willen»; oder *manushyās trāyante* pass., was zur satzconstruction besser passte; oder wie oben im anschluss an Âçv. (ṛ. l. c.]; त्वयिमासंतं mss. ausser B5P2, मातिषुर्मा (?) corr. मोस्तुषुर्मा B5 मो ऽस्तुषुर्मा P2 नमोग्रस्तुषुर्मारिषुर्मा d. übr. cf. sub a), दाङुः (?) corr. दाँसि [दाँसिस B5 aus

च । ४। एतेन धर्मेण चतुरो मासान्सर्पबलिं कृत्वा विरमति । ५ । तूष्णीमपि प्रहृत्य प्रक्षालितपाणिः । ६ । ॥ १६ ॥

अयूथिके भयार्ते कपोते गृहान्प्रविष्टे तस्यामग्नौ पदं दृश्येत दधनि सक्तुषु घृते वा "देवाः कपोत इति प्रत्यृचं जपेज्जुहुयाद्वा ।

देवाः कपोत इषितो यदिच्छन्दूतो निर्ऋत्या इदमाजगाम ।
तस्मा अर्चाम कृणवाम निष्कृतिं शं नो अस्तु द्विपदे शं चतुष्पदे ॥ a)
शिवः कपोत इषितो नो अस्त्वनागा देवाः शकुनो गृहेषु ।
अग्निर्हि विप्रो जुषतां हविर्नः परि हेतिः पक्षिणी नो वृणक्तु ॥ b)
हेतिः पक्षिणी न दभात्यस्मानाष्ट्रां (?) पदं कृणुते अग्निधाने ।
शं नो गोभ्यश्च पुरुषेभ्यश्चास्तु मा नो हिँसीद्दिवं देवाः कपोतः ॥ c)
यदुलूको वदति मोघमेतद्यत्कपोतः पदमग्नौ कृणोति ।
यस्य दूतः प्रहित एष एतत्तस्मै यमाय नमो अस्तु मृत्यवे ॥ d)

दंक्षिषुः ?) alle. — 4) धुवामुंते so M2B1.5 Pa धुवांमुंते M1 धुवामंते LN P2 Ne धुवामते M1cB1c, सर्वामात्यान्यज्ञमानस्यनामयाकं PaP2 u. comm. सर्वान्यज्ञ० NL सर्पान्यज्ञ० M1.2B1 सर्वामात्यानामयाकं B5, st. *ātmānaṃ ca* haben d. mss. चामात्येभ्यः (fehlt in Pa u. comm.) [Ich habe corr. nach B5 u. Âçv. Gṛ. 2, 1, 12; *yajamānasya* mss. ausser B5 ist wohl glosse cf. zu 2, 12, 2; चामात्येभ्यः ist viell. direct aus *ātm° ca* entstanden]. — 5) दत्वा (st. *hṛtvā*) mss ausser B5PaP2 u. comm., विरमेति (aus *virama iti* ?) M2B1N. — 6) (fehlt in Pa) प्रहृत्य so P2 u. comm. प्रहृत्यः B5 प्रू[प्रु M1.2M1c]क्षात्प्रक्षा° d. übr.

17: 1) (cf. KJ 80) तत्राग्नौ B5PaP2 (d. comm. aber auch w. o.), पदे M1, दृश्येत B5 दृष्यते P2, दधनि so B5PaP2 दृश्येताधनि d. übr. (im comm. nicht citirt), सक्तुघृतेनवा B5 (*ghṛte* in Pa u. comm. nicht erwähnt); — a) यदिच्छं B5 यदृच्छं P2 यद्विच्छं M1LN यादिच्छं M2B1 (alle also *ṃ* st. *n*!), तस्मार्चाम P2, अर्चाकृण° M2B1N; — b) शिवाः N शिवा M1.2B1L, अस्तु ॥ नागा B5 u. ohne ॥ P2; — c) न दभात्य° corr. नदभात्य° B5 निदभात्य° P2 निदधात्य° M1L नद्धात्य° M2B1 नदधास्त° N, °नाष्ट्रां so nur B5 °न्नाष्ट्रं P2 °नाष्ट्रा M1 (fehlt in L) °न्यष्ट्रा M2B1 °न्मृष्ट्रा N (wahrscheinlich °नाष्ट्रापदं «den verderbens- oder unglücksfuss» zu lesen; आष्ट्रौ «küche» ist ἅπ. λεγ., etymol. zweifelhaft u. neben *agnidhāne* mindestens überflüssig); — d) वदंति B5, कृणोतु B5P2, एष fehlt B5 [mit

ऋचा कपोतं नुदत प्रणोदमिषं मदन्तः परि गां नयध्वम् ।
सँयोपयन्तो दुरितानि विश्वा क्षिवा न ऊर्जं प्रपतात्पतिष्ठः ॥ e)

इति । १ । पदमादाय दक्षिणाप्रत्यङ्क्रामति । २ । सकृदधिकरणीयति । ३ । स्वकृत इरिणे पदं न्यस्याध्यधिं । ४ ॥ धाम्नो धाम्न इति तिसृभिः परोगोष्ठं मार्जयते । ५ । अनपेक्षमाणाः प्रत्यायति । ६ ॥ अग्न आयूँषि पवसे " अग्निर्ऋषिः " अग्ने पवस्वेति प्रत्येत्य जपति । ७ । ॥ १७ ॥

षाडाकृतं प्रतिपदि प्रतिपदि पुत्रकामः । १ । पयसि स्थाल्योपाकँ श्रपयित्वा तस्य जुहोति ।

ब्रह्मणाग्निः सँविदानो रक्षोहा बाधतामितः ।
अमीवा यस्ते गर्भं दुर्णामा योनिमाशये ॥ a)
यस्ते गर्भममीवा दुर्णामा योनिमाशये ।
अग्निष्टं ब्रह्मणा सह निष्क्रव्यादमनीनशत् ॥ b)
यस्ते कुक्षि पतयन्तं निषत्स्नुं यः सरीसृपम् ।
जातं यस्ते जिघाँसति तमितो नाशयामसि ॥ c)
यस्त्वा स्वप्नेन तमसा मोहयित्वा निपद्यते ।
प्रजाँ यस्ते जिघाँसति तमितो नाशयामसि ॥ d)
यस्त्वा भ्राता पतिर्भूत्वा जारो भूत्वा निपद्यते ।
प्रजाँ यस्ते जिघाँसति तमितो नाशयामसि ॥ e)
ये ते प्रत्यप्सरसो गन्धर्वा गोष्ठाश्च ये ।
क्रव्यादं सुरादेवनं तमितो नाशयामसि ॥ f)

---

diesem vers schliesst B5]; — e) ऋचाः mss. incl. P2 ausser M2, नुदतः [°वः L] alle, प्रणोदं-मिषं P2 [प्रणोदमिषं M1 °दमिषे L], परि fehlt B1, गा M1, कृत्वा P2, पतिष्ठत् (st. *patishṭhaḥ*) P2. — 4) (zu 2-6 cf. 2, 1, 8-12) इरिणे P2. — 6) °नवेक्ष्य° mss. ausser P2. — 7) अग्न so alle (P2 danebeu अग्ना, Mān. Ç. wiederholt u gew. auch अग्न), पवसा M1LP2 °स d. übr.

18: 1) षाडा° so Pa u. P2 correcter als षडा° d. ubr. incl. comm. u. KB, प्रतिपदि M2 B1NM1cB1c nur einmal, M1L haben nach dem 2. *pratip*° den zusatz सँवत्सरीये (geschr. °रीरे M1 °रिरे L). — 2) c) यस्तंकुक्षि P2; — e) fehlt L, प्रजा M2; — f) यस्ते (st. *ye te*) mss. ausser P2, °दसरसा mss. ausser M1P2, गोष्ठा-श्चये so P2 °श्च ॥ ये M2B1N गोष्ठाश्चये M1L,

यस्त ऊरू विकृत्यत्तरा दंपती शये ।
योनिँ यो अन्तरारेढि तमितो नाशयामसि ॥ g)
अभिन्नाण्डा वृद्धगर्भा अरिष्टा ओषसूवरी ।
विज्ञायतां प्रजापतामियं भवतु तोकिनी ॥ h)
विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिँशतु ।
आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ॥ i)
गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति ।
गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजा ॥ k)
हिरण्ययी अरणी यं निर्मन्थतो अश्विना ।
तं ते गर्भं हवामहे दशमे मासि सूतवे ॥ l)
परि मृत्यो अनुपरेहि पन्थां यस्ते स्व इतरो देवयानात् ।
चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजाँ रीरिषो मोत वीरान् ॥ m)

इति द्वादश गर्भवेदिन्यः । षडाद्याः स्थालीपाकस्य । षडुत्तरा आज्यस्य । २ । त्रयप्रभृति समानम् । ३ ।

नैऋमेषँ स्थालीपाकँ श्रपयित्वा यथा षाडाङ्कृतम् ।

नैऋमेष परापत सुपुत्रः पुनरापत ।
अस्यै मे पुत्रकामायै पुनराधेहि यः पुमान् ॥ a)
यथेयं पृथिवी मह्युत्तानो गर्भमादधे ।
एवं तं गर्भमाधेहि दशमे मासि सूतवे ॥ b)

°देविनंतमितो so P2 °देवीनस्तमितो M2B1LN °देवीनंस्तममितो M1; — g) fehlt M2B1, विकार° M1L विकारं° P3, शयेत् P2; — h) अभिनांडा so P2 u. *abhinnāṇḍā* KB अभिन्नांगा L °न्नांगो M1 °न्नागा M2B1N, °गर्भाश्च° so schreiben alle, °सूवरीः ॥ M1L; — i) पिँशंतु L, आसिचतु M2 B1N, गर्भे M1; — k) देहि beide mal M2B1N, सरस्वती mss. incl. P2 ausser NL, अश्वि° M1, °स्रजौ P2 °सृजा M1.2; — l) हिरण्य° corr. हिरण्म° alle (auch N?); — m) मृत्योनुश्च° B1 u. [मृत्य°] M2, पथाँ N. देवाया° B1; — °त्तराद्यस्य M2B1N. — 3) सामान्यं M1. — 4) षडाङ्क° mss. incl. comm. ausser PaP2; — a) नैऋमेषः mss. ausser M2B1 (*h* alle so zu l.?), परापतत् mss. incl. P2 ausser M2B1N, सपुत्रः P2 सुपुत्र M2, पुनरापतत् P2; — b) °त्ताना corr. °त्तानां alle, त्वं (st.

विष्णोः श्रेष्ठेन रूपेणास्यां नार्यां गवीन्याम् ।
पुमाँसं पुत्रमाधेहि दशमे मासि सूतवे ॥ c) । ४ । ॥ १८ ॥

पाकयज्ञान्समाप्याग्न एकाज्यामेकबर्हिषि ।
एकँ स्विष्टकृतं कुर्यान्नाना सत्यपि दैवते ।
नाना सत्यपि दैवत इति ॥

इति मैत्रायणीयमानवगृह्यसूत्रे द्वितीयः पुरुषाख्यो भागः समाप्तः ॥ २ ॥

॥ इति मानवगृह्यसूत्रं समाप्तम् ॥

---

tam) P2; — c) विष्णो (so zu l. ?) M1LN, नार्या so L नार्यी (तार्यी M2, P2 bloss न्यां corrumpirt) d. übr., गविन्यां N गविन्या M2, पुत्रमा° so P2 पुत्राना° M2B1 u. [*pa*°] N पुमाँसपुत्रना° M1L.

Zum Çloka cf. Âçv. Gṛ. 1, 3, 10 (fehlt in P2 u. comm., nicht aber in Pa) एकाज्या एकं बर्हिषः Pa (textform ?), दैवते corr. देवते alle (auch Pa zweimal, in der erkl. aber दै°).

Die unterschrift zu I nach M2B1, zu II combinirt nach M1.2LB1N, zum ganzen nach M2B1.

COMMENTAR.

VORBEMERKUNGEN.

Der titel «Commentar» soll besagen, dass der commentar zwar nicht vollständig gegeben ist, wohl aber in einer ausführlichkeit, der gegenüber die bezeichnung «Auszüge aus dem commentar» viel zu wenig bedeuten würde. Mein bestreben war, ihn, dem ich zu Purusha II auszüge aus dem vortrefflichen Pa zur ergänzung und klärung der sache beifüge, unter wahrung seines characters in einem umfange vorzuführen, dass er eine vollständige ausgabe zu ersetzen im stande ist. Es geschah neben anderen gründen vor allem aus rücksicht auf weniger eingeweihte und auf Inder, die sich für das Mān. Gṛ. S. interessiren dürften. Bei diesem bestreben war nicht zu vermeiden, dass hie und da auch unwesentliche dinge mitaufnahme fanden; im allgemeinen aber ist alles, was nichts zum unmittelbaren verständniss des Sūtratextes beiträgt, wie einleitende bemerkungen, excursartige abschweifungen und dgl. weggelassen. Was daher der leser für die interpretation in meiner auf diese weise gekürzten commentarausgabe vergeblich sucht, würde er auch im vollen commentar nicht finden. So gebe ich denn auch meinen text fortlaufend und setze puncte nur ausnahmsweise (in der erklärung bedeuten sie inhaltlich gleichgültige oder corrumpirte resp. mir völlig unverständliche stellen, in den citaten aus dem Sūtra abkürzung dieser citate). Dem text habe ich Nc zu grunde gelegt; v. l. ist daher immer = MicBic. Ueber den traurigen zustand der mss. und ihre interpunction s. Einl. Wo ich irgend wie sicher zu sein glaubte, habe ich stillschweigend verbessert ohne angabe der lesarten. Was ich etwa dabei versehen habe, mag mir der geist des commentators verzeihen, indem er jedenfalls weniger grund hat mir zu zürnen als den flüchtigen abschreibern seines bedeutenden werkes. Var. lect. sind in den textcitaten reichlicher gegeben, in der erklärung aber im allgemeinen nur für characteristische oder zweifelhafte fälle. Besondere nachsicht erbitte ich mir vom leser auch für meine interpunction, die ich

nicht überall mit der gewünschten sicherheit durchführen konnte und sie daher gelegentlich auch lieber ganz wegliess, statt in's blaue hinein zu sündigen. In orthographischer beziehung gebe ich die an der spitze stehenden citate aus dem Sūtra ganz in der weise der mss.; sonst richte ich mich nach den PWbb. Den äusseren Saṃdhi aber habe ich auch in der erklärung für gewöhnlich uncorrigirt gelassen, zumal Virāma und nichtcontraction sehr häufig ein leichteres interpunctionszeichen vertreten. Den Avagraha schreiben M1ĉB1c selten und Nc fast nie; ich habe ihn überall gesetzt.

Purusha I.

1.

1. उपनयनप्रभृति व्रतचारी स्यात्। उपनयनं व्रतबन्धः। तत्प्रभृति व्रतानि चरेत्। उपनयनादनन्तरं व्रतचरणशीलत्वमन्तेवासिनि संपादयेदित्यर्थः। एतेन व्रतानामात्मसंस्कारार्थतामपि द्योतयति। तथा च व्रतस्नातकः स्मृतौ च दर्शितः 'आत्मसंस्कारमध्ये गणनात्। अ[स्व v. l.]यमप्येतेन धर्मेण हादशेत्युपक्रम्य ब्रह्मचर्यं चरत (1, 2, 6) इत्यात्मसंस्कारार्थतां व्रतानां वक्ष्यति। अध्ययनार्थतामपि व्रतानां वक्ष्यति 'एतेन धर्मेण माधवोत इति (1, 2, 7)। गर्भाधानादिषूपनयनान्तेषु संस्कारेषु पितुरधिकारः 'योगधर्मेणेति। अध्ययनव्रतेषु स्वयमधिकारो गुरूपदिष्टेषु तु। तस्मादुच्यते प्राग्व्रतेभ्यः पितुर्[ता v. l.] धिकारो[री v. l.] व्रतादौ तु स्वयमिति। उपनयनप्रभृतिग्रहणात् प्रागपि वेदस्यारम्भाद्व्रतचारी स्यादिति गम्यते। तच्च प्रागध्ययनारम्भाद्व्रतचरणं नास्तीति वृद्धैरयुक्तमुक्तम्॥

2. मार्गवासाः 'मार्गे वासो यस्येति। इदं चोत्तरीयं वास इत्यौपचारिकं 'वास इव वासः। मुख्ये हि वासस्त्वे मार्गस्योत्तरीयत्वे ऽभ्युपेते द्विवस्त्रता स्यात्। ततश्च द्विवस्त्रो ऽत ऊर्ध्वमिति (1, 2, 17) विरुध्येत॥ संकृतकेशः 'संकृताः कृत्ताः केशा यस्येति। यद्वा संकृताः संगता जटीभूताः केशा यस्येति। उभयमप्येतत्प्रमाणम्। तृतीयो ऽपि यतो ऽस्ति 'शिखाजटः इति (1, 2, 6) वक्ष्यति 'मुण्डः शिखाजटः सर्वजटो वेति (ib.)॥ भैक्षाचार्यवृत्तिः। भैक्षं चाचार्यश्च भैक्षाचार्यौ तौ वृत्ती यस्य स भैक्षाचार्यवृत्तिः। भैक्षवृत्तिश्च स्यादाचार्यवृत्तिश्च स्यादित्यर्थः। भैक्षालाभे वा आचार्याद्वृत्तिः॥ मशल्कदंडः। मस्रु त्वचा दण्डः स्यादित्यर्थः॥ मप्तमुंजां मेखलां धारयेत्। मप्तमुंजामिति मप्तानां मुञ्जानां विकारः 'मप्तभिर्मुञ्जैर्वा निर्वृत्ता या तां बिभृयात्॥ आचार्यस्याप्रतिकूलः। यल्लोकनिर्बन्धवर्ती[ति यावत्॥ सर्वकारी। सर्वं मृदुदकाहरणादि यत्कृत्यमाचार्यस्य गृहे तत्कारी स्यात्। अनाज्ञातो ऽपि सर्वं प्रेष्यकर्म कुर्यात्॥

3. यदेनमुपेयात्तदस्मै दद्यात्। यद्धनं पित्रादेर्निधिलाभाद्वा (ohne *vā* v.l.) ब्रह्मचारिणामुपनमेत्[पि v.l.] तद्धनं तस्मै आचार्याय दद्यात् ॥ बह्वृनां येन संयुक्तः। बह्वृशब्दो ऽनेकोपलक्षणः। तेन द्वयोरपि येन संयुक्तः स्यात्। बह्वृनामाचार्याणां येनाचार्येण व्यापारसंबन्धेन युक्तस्तस्मा एव दद्यात्। न विभज्य सर्वेभ्य इति॥

4. नास्य शय्या[य्य v. l.]माविशेत्। अस्याचार्यस्य शय्यामने प्रातिस्विके नाविशेत्। उपवेशनप्रतिषेधात्सवेशनस्य सामर्थ्यात्प्रतिषेधः। शय्याग्रहणमासनोपलक्षणार्थमपि ॥

5. न संवसत्रेयेत्। wird bloss citirt; der zusatz in Kāṭh. Gṛ. *ācāryaparihitaṃ vastraṃ na paridadhīta* ist wohl die erklärung dazu.

6. न रथमारोहेत्। अस्येति नानुवर्तते। रथग्रहणं हस्त्याद्युपलक्षणार्थम् ॥

7. नानृतं वदेत्। उपक्रामेनापि अनृतं वचनं न ब्रूयात्। अनृतोपलक्षणात्वात् पैशुन्यपारुष्यादि वचनं च न वदेत् ॥

8. न मुषितां स्त्रियं प्रेक्षेत। मुषिंतव मुषिता चौरैर्हृतवत्त्वेव नयेत्यर्थः। सर्वाणि सांस्पर्श[र्शि Ne]कानि स्त्रीभ्यो वर्जयेदिति (sū. 11) मिह आचारार्थो निषेधः। नग्नाप्रेक्षणस्याभ्युदयप्रतिकूलत्वात् न मुषिताशब्दो मुख्यार्थः। यदृष्टार्थत्वप्रसङ्गात् मुषिता सवस्त्रापि नेक्षितव्या स्यात् ॥

9. न विकारार्थी स्नेयेत्। विकारः क्रीडनं। तदर्थतत्कार्यादि गृहविकार उच्यते। उपवनादि च। अर्थो हिरण्यादिः। विकारार्थो भार्याद्याश्रितं हिरण्यादिविषयं च स्नेहवादं न कुर्यात्। यद्वा विकारस्नेहार्थो देश उच्यते। यागभूमिस्तदुपलक्षणाच्च यागः। तदर्थं विद्याभिमानेन क्षत्रियादिभिः सह नैव वादं कुर्यादित्यर्थः ॥

10. न रूप्यर्थं किंचन धारयेत्। अभिप्रेत्यर्थं शोभनार्थं च गन्धमाल्यादिकं च न बिभृयात् ॥

11. सर्वाणि सांस्पर्श[र्शि Ne]कानि स्त्रीभ्यो वर्जयेत्। संस्पर्शः संप्रयोगः। संस्पर्शनिमित्तानि सांस्पर्शिकानि स्त्रीभ्यो स्त्र्यर्थं यानि। स्त्रीसंस्पर्शोत्पादकानि स्त्रीवर्णनं काव्यश्रवणं स्त्र्यभिधानं स्त्र्यवगवं स्तनकक्षानितम्बोरुवदनचतुरोदरीक्षणं नृत्ययोगादीनि च वर्जयेत्। स्त्रीभ्य इति पञ्चमी वा। संस्पर्शावानि कण्डूयनोद्वर्तनादीनि। कारणाप्रतिषेधेन गृहीतस्य संस्पर्शस्य कार्यस्य प्रतिषेधः ॥

12. न मधुमांसे प्राश्नीयात् क्षारलवणे च। तत्र क्षारस्य यवक्षारगुडसर्जिकादेः प्रतिषेधो न स्यात्। लवणस्यं च सैन्धवस्येत्येतत्समासद्वयं कृतम् ॥

13. न स्नायात्। नित्यकाम्यया यदधिकानां स्नानानां प्रतिषेधो ऽयम्। न स्नायादनिमित्तत इति युक्तम्॥ उदकं वाभ्यवेयात्। नेति वर्तते। वाशब्दस्य चकारार्थत्वात्तेनायमर्थ उदकं च नाभ्यवेयात्। उदकमध्ये... प्रतरत्वान्न गच्छेत्। यदा लभ्यवेयातदा स्नानकाले उदकसमीपमाचमनार्थं गच्छेदित्यर्थः ॥

14. यदि स्नायादंड इवाप्सु परिप्लवेत। वाशब्दो ऽनुवर्तते ' यदि वा etc.। विकल्पो व्यवस्था वा। श्राद्धादौ दण्ड इवेति ' मलापकर्षणमुद्वर्तनादि न कुर्यादित्यर्थः॥ केचिदत्र खण्डममाप्तिं कुर्वन्ति॥

15. प्रागस्तमयान्निष्क्रम्य समिधावाकरेत्। समिदाकरणस्य कालनियमार्थं वचनम्॥ करिष्यो ब्रह्मवर्चसकाम इति श्रुतिः। करितवर्णो ऽश्यामे समिधौ। श्रुतिग्रहणं गोचरार्थमात्मनः। अथवा करितवर्णो पीतवर्णो ते च स्वभावशुष्के पीते भवतो न तु क्लिन्ने। ते हि शुष्के ऽश्यामे भवताम्[तः v. l.]। तथा च स्मृत्यन्तरम्राद्रामन्नाद्यकामः पुष्टिकामस्तेजस्कामो वा ब्रह्मवर्चसकाम उपवाताम् (Âçv. Gṛ. 3, 8, 4)। उपवातां हि स्वभावशुष्कामित्यर्थः॥

16. इमं स्तोमम् etc.। समूहनं संमार्जनं ' कुस्तेन समूह[हि Nc]न्या वा। अग्निशब्दो ऽग्निसमीपवचनो ऽत्र ' न ह्यग्नौ संमार्जनादि संभवति। पर्युक्षणेनोपशाम्येन्नाग्निः ' परिस्तरणं दक्षेत। स्वाहाकारं केचिदिच्छन्ति समिदाधाने॥

18—23. यद्ग्ने ... मुखं विमृष्टे। मुखावमर्शनं (!) पाणिना॥ भद्रं ... श्रोत्रे अभि[ऽत्रेभि Nc]मृशति। दक्षिणेन पाणिना दक्षिणं श्रोत्रं पूर्वं पश्चादुत्तरं ' उभाभ्यामुभयोर्वा सकृ॥ चक्षुषी तथैव॥ शिरःप्रभृतीन्यङ्गानि तथैव॥ हृदयदेशं चित्तदेशमारभ्येत्यर्थः॥ रूपं ... पृथिवीमारभते ' पाणिना सामर्थ्यात्। न ह्यनारभ्य पृथिवीं केनचिदासितुं शक्यते॥

24. त्र्यायुषं जमदग्नेरिति भस्मना शिरःप्रभृतीनामङ्गानां संस्पर्शः। तिसृभिर्मृद्भिः सकृन्मार्जनम्। अथवापो हि ष्ठेति तृचेन मार्जनमिति मिश्रे यदापोहिष्ठीयाभिरिति बह्वृचवचनं तन्मार्जनत्रयं प्रत्यृचं बह्वृचवचनाद्भ्यते॥ अथ कथं प्रातरग्निकार्यम्। यस्मात्प्रागस्तमयान्निष्क्रम्य समिधावाकरेदिति (sû. 15) वचनात् सायमेव स्यात्। उच्यते। संध्योपासनादुत्तरकालमग्निकार्यं सामर्थ्यादिह लभ्यते। यच्चपूर्वं पठति तत्तद् ज्ञापयति प्रातरप्यस्तोति। समिधौ तु प्रातरेवाकरिष्यति ' कथं पुनः संध्योत्तरकालमग्निकार्यम्। उच्यते। संध्योपासनं समिदाकरणं च। प्रागस्तमयान्निष्क्रमणं संध्योपासनार्थं समिदाकरणार्थं च तत्त्वेन संबध्यते। यतो गृहे ऽग्निकार्यं बहिः संध्या प्रागस्तमयान्निष्क्रान्तो नानुपासितसंध्यो गृहं प्रविशेत्। इतरथा दिवा समिधावाकरेदिति ब्रूयात्। तस्मादनुसूत्रणादेव न्याय्यादनुक्तमपि प्रातरग्निकार्यं स्यात्॥

2.

1. अथ संध्यामुपास्ते। अथशब्दो ऽत्र संध्योपासनप्राक्रियोपन्यासार्थः ' संध्याशब्दः प्रक्रियार्थः ' वक्ष्यमाणं संध्याप्रकरणमिति प्रतीयते। यद्वा अथशब्द आनन्तर्ये ' आपोहिष्ठीया अथेति। यद्वा समुच्च-

यार्थो ऽयशब्दः । तेन प्रातःसंध्यावदग्निकार्यसिद्धम् । संध्यां । आस उपवेशने तदा संध्यायामुपविष्टः स्यादित्यर्थः । अधिकरणसप्तम्यां द्वितीया समग्रसंध्याकालव्यापनार्था । यावत्संध्यामुपासीनः स्यादित्यर्थः । उपास्ते समासीनः स्यादित्यर्थः । उपासना तु सांवतुः । संध्योपासनार्थतामुपास्ते । अत एवं प्रातस्तिष्ठन्निति (su. 5) वक्ष्यति । अत्र संध्यामिति कर्मनामधेयमेवाष्टकावद्भवत् । तेनायमर्थः संध्याकर्म कुर्वीतेति ॥

2. प्रागस्तमयात् ... इत्यावाक्षर्यात । तत्र केचित् उत्तरतो ग्रामस्य पुरस्ताद्वेति दिग्नियमः । ग्रामस्य ग्रामावयवस्य गृहस्येत्येके । गृहावयवस्यापि प्रधानशालायां ग्रामावयवादित्यपरे । तदसत् । प्रामाण्यार्थपरित्यागे कारणाभावात् प्रागायतस्य ग्रामस्य पश्चादुत्तरा वा दिक् सा गृहस्य पूर्वा यद्गृहस्य पश्चिमापि सर्वग्रामस्योत्तरेवेति को दोषः शाब्दे ऽवगमे । वाशब्दो विकल्पे ॥ शुचौ देशे । स्वभावशुचावित्यपरे । तदसत् । प्रयत्नेन शुचिः स्यात् । शुचेर्देशस्य संभवे शुचिदेशस्य निषद्येत्यनुवादः । उपस्पर्शनाङ्गत्वेन प्राप्तेः आत्म[न्न v. l.]निर्बन्धनात्पाणा प्रक्षाल्येत्याद्युपस्पर्शावयवलक्षणार्थम् । तथा शुचौ देश इत्यपि । अथवा निषद्य उपविश्य संध्यामुपास्त इति प्रधानेन संबन्धः ॥ अपामंजलिं पूरयित्वा । आद्रियेति सामर्थ्यात्संबन्धः । अपामिति तृतीयार्थे विपरिणता षष्ठी ॥ प्रदक्षिणमावृत्य । प्राङ्मुखेनोदङ्मुखेन वा आवर्तनं कृत्वा । तत्रार्थात्सावतारं प्रत्यावर्तयेत्प्राप्तेः ॥ अत्र कथं राजन्यवैश्ययोरावाक्षर्यम् । त्रिष्टुप् छन्दसां । जगता छन्दसामित्यूरुः । अनूरुर्वा । वाग्वैशाया [य Nc] । अथैव वाक्सर्वाणि छन्दांसीति कृत्वा ॥

3. ओजो ऽसीति ... प्रयुक्ता [क्तां v. l.] । ओजो ऽसीति जपित्वा गायत्रीं स्तुवेत्यर्थाद्गम्यते ॥ कस्ते । उक्तं च । ओंकारपूर्वं कस्ते पुनक्तीति ओंजपित्वा गायत्रामेवावाक्षर्नात्प्रकृतौ । ओं भूर्भुवः स्वस्तत्सावितुरिति प्रणवप्रभृतीति । इतिकरणेन स्वरूपतां द्योतयति । तेन प्रणवप्रभृतीनामावृत्तिरिष्टा । उक्तं च । एतदक्षरमेतां च जपन् व्याहृतिपूर्वकां संध्ययोरिति ॥ इत्याम्नाताः कामाः । इतिशब्दः प्रकारार्थः । एवंप्रकारा ये उक्ताः कामा इत्यर्थः । क्व । गायत्रीकल्पे ॥ अष्टौ कृत्वः प्रयुक्ता [क्तां v. l.] । गायत्रासंमिता ब्रह्मवर्चसकामस्येत्यादयः । उपासीतेत्यधिकारः । उपासनं च प्रणवादिमन्त्राभिधेयदेवतायाः । देवतालम्बना चोपासना । तत्र देवतास्वरूपद्योतकमन्त्रावृत्तौ अर्थसिद्धायां संध्याया विधानं फलार्थम् । (.. अग्निहोत्रवत् ... अग्निष्टोमवत् ... तद्वद्) अष्टासंध्या नित्या अष्टौ कृत्वः प्रयुक्तं [क्तां Mic युक्ता Bic] इत्युक्ता इत्याम्नाताः कामा इत्युक्तम् ॥ आ देवो यातीति त्रिष्टुभं [भ v. l.] राजन्यस्य । युञ्जत इति जगतीं [तो Nc] वैश्यस्य । अष्टौ कृत्वः प्रयु[युं v. l.]क्तेति सामानाधिकरण्यात्प्रथमान्तः पाठो युक्तः त्रिष्टुप् जगतीति । त्रिष्टुभं जगतीमिति पाठे जपेदित्यध्याहृत्या Nc]ह्रियते । द्वितीयान्तत्वात्त्रिष्टुबादेः राजन्यादेः प्रथमान्तत्वादष्टौ कृत्व इति वाक्येन संगतिर्न स्यात् । प्रणवव्याहृतयो न प्राप्नुयुः । कथमत्र पाठे केन संबन्धः । उच्यते ।

त्रिष्टुब्जगत्योः सवितृत्वाडुक्तं सावित्रोकल्पं। सैषा सावित्री सार्वकामिकी ब्रह्मणो मुखं इत्यादि। ओंकाराव्याकृतयो ऽपि स्यात् ब्रह्मणो मुखत्वात्। कास्तिन्न इति प्रणवव्याकृतिसावित्र्यास्त्रयं ब्रह्मणो मुखम्। अन्यस्त्वाह 'षष्ठी कृत्वः प्रयु[यु Mic]क्त इति केचित्पठन्ति [इद Nc]न्ति पूर्वसूत्रे। तदा द्वितीयोपपद्यत एव। किंतु राजन्यवैश्यशब्दौ षष्ठ्यन्तौ पठन्ति। अथवा ब्राह्मणापेक्षया द्वितीया च षष्ठी च 'प्रयु[युं Bic]क्त इति वर्तते पूर्वसूत्रात्। तेनायमर्थः 'राजन्यस्य त्रिष्टुभं ब्रूयाद्ब्राह्मणः 'वैश्यस्य जगतीमिति। प्रब्रूयाद्ब्राह्मणस्तेषां नेतराविति निश्चय इति। सावित्री ब्राह्मणादिवर्णानां गायत्री त्रिष्टुब्जगती च क्रमेण 'गायत्री वै ब्राह्मणस्त्रैष्टुभो राजन्यो जागतो वैश्य इति॥

4. उदु त्यं...°त्सृजति। निगदेनमुच्चैरुपांशोः सकाशात्। ततश्चोपांशु गायत्री प्रयोक्तव्येत्यर्थाडुक्तं भवति॥ कस्ते विमुञ्चतीति विमुच्य गायत्री 'तस्या एव योन्वयितत्वात् त्रिष्टुब्जगत्यौ॥ उदकपूर्णाञ्जलिः उदकाञ्जलिः। पूर्वपदं प्राधान्यमुत्सृजतिशब्दात् गृह्णतस्य स्रुत्सर्गः। उत्सर्जनं पूर्वपदार्थः स्यादित्यर्थः। एवं चोदकपूर्णाञ्जलिना जप्तव्यम्॥

5. एवं प्रातस्तिष्ठन्। संध्यामुपासीतेति वाक्यशेषः। प्रातरेव तिष्ठन्न सायमिति। नियमार्थस्तिष्ठन्शब्दः। तेन च सायमासीन उपास्ते॥ एवमिति पूर्वोक्तविधिं निर्दिशति। किंतु प्रातर्व्युष्टायां निष्क्रमणासामर्थ्यात्। अग्निकार्यं च संध्योपासनवत्। यदा सायमेवाग्निकार्यं 'सायमेवाग्निं समर्चयत इति गृह्यान्तरम् (vgl. zu 1, 1, 24)॥

6. एतेन धर्मेणेत्यादि यत्किंचिन्मनसेप्सतीत्यन्तसूत्रं यः स इत्यन्वयः। एतेन मार्गवासस्त्वादिना व्रतकलापेन द्वादश चतुर्विंशति षट्त्रिंशतमष्टाचत्वारिंशतं वा वर्षाणि। वा वर्षाणीति प्रत्येकं संबध्यते॥ यो ब्राह्मणो राजन्यो वैश्यो वा। वाशब्दः प्रत्येकमभिसंबध्यते। ब्राह्मणादिव्यवस्थां नियममाह। तेन शूद्रस्योपनयनादि न भवति॥ ब्रह्मणो वेदस्य चर्यं चरणं अध्ययनं चरति कुरुते। अथवा ब्रह्म वेदः 'तदध्ययनाङ्गानि व्रतान्यपि ब्रह्मोच्यते 'चर्यामनुष्ठानं चरति कुरुते॥ व्रतप्राधान्यपक्षे मुंडः 'उक्तकेशः। शिखाव्रतः 'शिखावर्त्र[र्ज्र Nc]मुण्डित इति द्वितीयः पक्षः। सर्वव्रतो वा तृतीयः 'संहृतकेश एवार्थान्यत्रेत्युक्तम्। मलघ्नः 'मलदिग्धवानुः 'मलापकर्षणनिषेधात्। अबलो अल्पबलः 'अलोमिका एडिकेतिवत् अल्पार्थता। कृशो अस्थूलः 'कृशतनुराकारलाघवे व्रतादिभिर्ब्रह्मचर्यसंरक्षणम्॥ एवंरूपः साक्षात्स ब्राह्मणादिवेदाप्युक्तं सर्वं विन्दते लभते। यत्किंचिन्म[चनम v. l.]नसेक्षति सर्वत्रमाधिकारिकम्॥ एवमनुष्ठितब्रह्मचर्यो यः स्नाति स काम्यादिकर्मस्वधिकारो नान्य इति। तस्यैव गार्हस्थ्यो[स्थो Nc]ऽधिकारः॥

7. एतेन धर्मेण साधधीते। यावदधीते तावदेतेन धर्मेणेति पक्षान्तरार्थमिदमुक्तं। यत्कृणात्येकमेव वे[मेवे v. l.]ति च स्मृते॥

8. छंदस्यर्थान् बुधा स्नास्यन् गां कारयेत् । आम्नाये त्रिवृच्छन्द इति प्रातिशाखां संज्ञामूत्रम् । आम्नाये वेदस्य गुणः छन्द उच्यते । तस्मिन्नर्थास्तांस्तथा वक्ष्यमाणधर्मेण स्नास्यन् गां प्रवरां गां कारयेत् । मधुपर्काद्या भूतां गां कुरुतेति (1, 9, 20) प्रेष्यन् कारयतीत्युच्यते । ननु आचार्यमर्क्षयेदिति (sū. 9) सिद्धे किं कारयेदिति ग्रहणेन । उत्सर्गनिवृत्त्यर्थं चेन्नादृष्टार्थकल्पनाप्रसङ्गात् तन्मा भूत् अन्येन वादिना ग्रहणमिति मधुपर्कलक्षणार्थं गामित्युक्तम् । अर्घानिति वक्तुवचनमर्घविधेयत्ववादकल्पनाप्रसङ्गात् । व्याकरणमीमांसादीनां सामर्थ्यगृहीतं परिज्ञानं । तद्विना वेदार्थावबोधो न शक्यः ॥

9. आचार्यमर्क्षयेत् ति यः [°मर्क्षीतयः v. l.] श्रोत्रियः । श्रोत्रियश्छन्दोधीत इति निपातनात् छन्दोध्यायी श्रोत्रियः । न मृद्वारिशुचिः । श्रोत्रियग्रहणमनधीतवेदस्यार्थावबोधाधिकारनिरासार्थम् ॥

10. अन्यो वेदपाठी न तस्य स्नानं । द्विविधो ब्रह्मचारी । उपकुर्वाणको नैष्ठिकश्च । तत्रोपकुर्वाण[णक Mic]स्य स्नानम् । अन्यस्य च ब्रह्मचर्येणैव निष्ठेति । अन्य उपकुर्वाणकोऽद्यपाठो ब्रह्मचारीत्यर्थावबोधादनन्तरं न तस्य स्नानम् ॥

11. आपो हि ष्ठेति तिस्रो हिरण्यवर्णाः शुचय इति ह । स्नानार्थं चोपादानादग्निभिरित्यध्याहियते । पञ्चभिर्ऋग्भिरेकं स्नानमिति प्रथमतृतीयात्वे स्नानवृत्तिराशङ्क्यते । अन्यस्त्वाह । स्नानस्य प्राधान्यान्मन्त्रस्य तदर्थत्वादेकमेव स्नानं पुक्तम् (der *anyas* und comm. sowie die weiter angeführten *kecit* weichen bloss in der motivirung von einander ab, nicht im resultat) ॥ स्नात्वा ग्रहीते वाससो परिधाने । स्नात्वा उदककलशेन शुचौ देशे ऽनुलिप्ते गुरुमतेन पवीपध्यादिवति ततो ऽहते वाससो परिधाने नवे अन्यत्रानुपयुक्ते ॥

12. वस्व्यसि ... परिदधाति । केचिदेतं मन्त्रं परिदानार्थं मन्यन्ते । आचार्यस्य परिददामीति पठन्ति । अन्ये तु वस्त्रपरिधानार्थं स्नातकस्य परिदधामीति परिदधातीति पठन्ति । एतदेवाक्षम [Nc Mic] पुक्तं । वसुमत्तं मा कुरु इत्याशीः पदमात्मानं ब्रूते मन्त्रे ॥

13. यथा द्यौश्चेत्यादि ग्रावेति इत्यन्तं । अञ्जने मन्त्रः । प्रत्यक्षमञ्जनं (sc. der augen) स्नातकस्य मन्त्रेण । शलाक्या अपरमिति श्रुतेः । अन्यस्तु दन्तिणं पूर्वम् । दन्तिणमिति पुराञ्जते तथापरमिति विवाहे वचनात् (1, 11, 8) ॥

14. हिरण्यमाबध्नीते । शुभकुण्डले स्मृत्यन्तरात् (cf. Âçv. Gṛ. 3, 8, 10) । अन्यदपि कटकादि यथासंभवमविशेषात् ॥

15. छत्रं धारयते गंधं मालां दंडं । दण्डमिति पालाशादिनिवृत्त्यर्थं वैणवोपलक्षणार्थं पुनर्वचनम् (cf. 1, 1, 2. 22, 11) ॥

16. प्रतिष्ठे इति उपानहौ । धारयतीति प्रकृतेन संबन्धः । मल्लनियम उपानक्रोः । एतच्चानयोरार्थे धारणे न प्रतिधारणे । अन्यधृते च न धारयेत् स्मृत्यन्तरे निषेधात् (cf. Gaut. 9, 4) ॥

17. अयं क्रमो ऽत्र । ज्ञातावयवं मुञ्चेन्मल्लस्नानात् । प्रभृतयो मल्ला वृत्त्या परिधानशब्दपत्ते । आचमनं परिवासधाना[धारणा v. l.]ङ्गत्वं । गन्धानुलेपनादि ॥ तस्मात् शोभनं ... श्रुतिः । स्नानमुत्तरतरं । शोभनं श्रेष्ठं विमलादि नाकृतं वृत्त्या धारयेत्पोषयेच्च । तथा प्रयत्नं कुर्याद्यथा शोभनं भवति । एतच्च सति विभवे स्मृत्यन्तरवचनात् (Gaut. 9, 3) । श्रुतिग्रहणमाप्तव्यापनार्थम् । श्रुतिशब्दश्च क्वचित्प्रथमान्तः श्रूयते । क्वचित् षष्ठ्यन्तः । यत्र प्रथमान्तस्तत्रावयवापेक्षया । यत्र षष्ठ्यन्तस्तत्रावयवव्याप्येक्षया ॥

18. आमन्त्र्य गुरून् गुरुवधूश्च स्वान्गृहान् पातिको ऽयम् । पिता हि मुख्यो ऽभिहितः । तस्यैव पुत्रानुशासने ऽधिकारात् । तदभावे ऽन्यो गुरुस्तन्यते वा [तन्मतेव v. l. = तन्मतेन ?] । गुरूनिति बहुवचनं पातिकं । बहूनां येनेति (1, 1, 3) संभवात्र पूर्वार्थः । केचिदेकवचनान्तं पठन्ति । गुर्ववरांश्च गुरुवत्पादं आमन्त्र्य विज्ञाप्य स्वान्गृहान् व्रजेत् । गुरुणानुज्ञातस्तदर्थानिः स्वगृहागमनं वेदार्थानुष्ठानार्थं । तदर्थत्वात् बुद्ध्या स्नातस्य स्वान्गृहानिति पितृगृहान् भावा[त्व v. l.]भावात् ॥

19. इदानीं स्नातकनियमानाह ॥ प्रतिषिद्धमपरया द्वारा निष्क्रमणं । भित्तिकाद्वारेण निःसरणात्सर्वाशेषत्वाद्दनिष्क्रमणनिषेधः ॥ मलवद्वाससा सह संवत्सरणं । मलिनवाससा जलेन सह निर्मलमपि न संवत्सरं । न संवत्सरयेत् (1, 1, 5) संवत्सरणमाकालदानम् ॥ रजःसुवासिन्या [+ वा v. l.] सह शय्या । न शोणितदिग्धवस्त्रिण्या सह शयनं । अरजःस्ववर्णमप्यापि । इतरया संभाषणस्यापि निषेधात् ॥ गुरोर्दुरुक्तवचनं । गुरुरत्र मात्रादिर्विद्यागुरुश्चाविशेषात् । दुरुक्तवचनमबाध्यभाषणम् ॥ अस्थाने शयनं ॥ स्वयनं । निष्प्रयोजनं क्रमणम् ॥ स[श v. l.]रणं । अकारणं वृथा भ्रमणम् । स्मरणमिति केचित्पठन्ति । तदा अस्थाने वेदार्थस्मरणम् ॥ स्थानं (u. sc. *yānam*) निष्प्रयोजनास्थितिमिक्षान्निज्ञासाकुलैर्वापरं रथ्यारोहणमनवसरे । अथवा श्लेक्षादिस्थानगमनम् ॥ गानं अध्ययनविज्ञानाभ्यासस्य प्रतिकूलत्वात् । शुष्कवादो वा गानं । कैगेशब्द् [कैठेरिशब्द्श v. l.] इति साकूचर्यान्नृत्याद्युपलक्षणं गानम् ॥ तस्य चेक्षणं । परेणापि क्रियमाणे गमनादौ अवेक्षणादि प्रतिषिद्धम् । चकारो ऽनुक्तसमुच्चयार्थः ॥

20. पौर्णा° . . यजेत [तु M1c] । स्नानसमनन्तरं पशुयागो ऽयं क्रमात् । ब्रह्मचर्यादौ पाकयज्ञपशूक्तेन (cf. 2, 5, 6) विधानात् ॥

21. तस्य क्रविः लालवणे चेत्यन्तं सूत्रं । किमयं भक्षणविधिः । नेत्यविडर्थं । ब्राह्मण एव क्रविःशेषमिति (2, 3, 14) अप्राप्तेर्नेत यज्ञमानभागानुवादः । नेत्यविडर्थं युक्तं । तस्य क्रविर्भक्षयित्वा यथासुख-

मत ऊर्ध्वं मधुमांसभक्षणेऽधिकारात्। अनुवादपक्षेऽपि। तत्रियवैश्ययोरस्ति मद्यादिलक्षणेऽधिकारानुवादत्वे तस्य कृच्छ्रभक्षयित्वा तेनेष्ट्वा मद्यादि प्राश्नीयादित्यर्थः। अनिष्ट्वानेन पशुना मांसादिभक्षणेऽधि-[ऽनधि v. l.]कारात् भक्षयेत्प्रायश्चित्ती स्यात्। आ[आ v. l.]द्वादिनियुक्तोऽपि मद्यादेः प्रसवं प्रति यथा सुखं स्यादिति॥

3.

1—3. स्नातकव्रतातिक्रमे प्रायश्चित्तप्रकरणमधुनेष्यते॥ यमेवं विद्वांसमित्यादि। ब्रह्मचारिणोऽप्येतत् प्रायश्चित्तान्तराना[ohne ना v. l.]म्नानात्। यमेवं विद्वांसमित्यनुवादः। प्रकृतत्वाच्छ्रुत्यर्थात्तुल्वेति। व्यवच्छेदार्थं वा। एवंशब्दात्। त्रिविधः स्नातकः। साधुरसाधुर्मध्यश्च। यत्रताध्यायो यसाधुः। द्वादशवर्षाण्यध्यायी द्वादशवर्षादि व्रतचारी साधुः। यसमाप्तव्रतविद्यो मध्यमः। तन्न मध्यमसाधुपरिसंख्यानार्थं यमेवं विद्वांसमिति। तयोः स्मार्तश्रौतप्रायश्चित्तं द्रष्टव्यम्। यद्यपि रुरुस्यप्रायश्चित्तमेतद्विदुषोऽधिकारादम्यते। ततश्चैवमिति प्रतिबुध्य व्रजेत्॥ अभ्युदियात् सूर्य इति स्मृत्यन्तरात्। शयनमपि गम्यते प्रतिबुध्यपदात्। यद्वा लोकयात्रानुवर्तापरिक्लमादिसक्तं संध्योपासनार्थमनिष्क्रान्तगतिक्रान्तसंध्योपास्यं सूर्यो ऽस्तमयोदयाभ्यो व्याप्नुयात्। स विद्वान् प्रतिबुध्य एतद्व्यतिक्रमात्ततः स्वरादि[←ना v. l.]शुचिर्व्रजेत्। किं तदाह॥ पुनर्मामित्यादि॥ उभावेवावधारणे पूर्वकल्पनार्थप्रसङ्गात्॥

4. यद्यचरणीयान्वाचरेत्। अपरया द्वारा निष्क्रमणादीन्यकर्तव्यान्याचरति॥ अनाक्रोश्यानिति व्यवच्छेदो भार्यापुत्राद्यर्थः॥ अभोज्यस्य वान्नमश्नीयात्। अभोज्यान्नस्य वा ऊष[ह्रुषि Ne ह्रुषि v. l.]कादेः स्मृतौ सप्तरात्रं यवान्पिबेदित्यादि (Manu 11, 153) तस्य गुरुत्वादस्मिन्विषये लब्धे तदुक्तमिति चेत्। यमेवं विद्वांसमित्यधिकारविशेषः। वेदविदपि विप्रो ऽस्येत्यर्थवादाद्विदुष एतत्। रुरुस्याधिकारो वायम्॥ अक्ति वा स्पंदे[स्पंदते v. l.]त्। स्फुरेदित्यर्थः॥ कर्णौ [र्णे v. l.] वा क्रोशेत्। शब्दायेतेत्यर्थः। अक्तिकर्णयोः स्पन्दन[स्यंदनं mss.]क्रोशनक्रियायां कर्तृत्वमौपचारिकम्॥ अग्निं वा चित्यमारोहेत्। परिगीतमिति केचित्। तदयुक्तम्। क्रत्वर्थो ऽसौ तिष्ठेत्। ततस्तदतिक्रमे ऽनाम्नातप्रायश्चित्तं क्रत्वर्थम्। इदं पुरुषार्थं निषेधस्य पुरुषार्थत्वात्। एवं यूपस्पर्शे ऽपि। इतरथा प्रायश्चित्तद्वयं क्रत्वर्थम्। पुरुषार्थं च स्यात्। नाग्निभ्यो व्यावर्तेतेत्यादौ निषेधातिक्रमे क्रत्वर्थमेव प्रायश्चित्तं। न पुनरिदं प्रतिपुरुषार्थम्। यस्य हि यद्यचरणीयान्वाचरेदित्यनेन सिद्धे ऽयं यूपं वो[नो v. l.]पस्पृशेत्। एवं सत्यनर्थकं स्यात्। तस्मात्सामान्येनायं निषेधः॥ श्मशानं वा गच्छेत्। मृतमनुगच्छेदित्यर्थः। यदि वा शवदाहकाले॥ रेतसो वा स्कंदेत्। रेतसः षष्ठीनिर्देशान्निद्रायां स्कन्दने प्रायश्चित्तम्। केचित्प्रथमान्तं पठन्ति। तत्राप्यविशेषान्नैमि-

त्तिकम्॥ एताभ्यां जुहुयात्। एवकारो वाक्यपरिपूरणार्थः। आकृती इत्यनुवादो मन्त्रद्वयेनाकृतिद्वयस्य सिद्धत्वात्॥ अपि वाज्यलिप्ते समिधावादध्यात्। आज्यग्रहणं संस्कारार्थं घृतलक्षणार्थं वा॥ अपि वा मन्त्रावेव जपेत्। एवकारो जपस्तुत्यर्थो न त्ववधारणार्थः। पूर्वसूत्रद्वयानर्थकप्रसङ्गात्॥

5. एवमधर्ममाचर्यास्थूलं। एवंप्रकारमधर्ममाचर्येति। केचिदस्थूलग्रहणमनर्थकं प्रकरणवचनेनैव साधिकत्वादस्थूलमुपपातकादि अधर्ममाचर्य एताभ्यामित्यादि कुर्यात्। एतच्च एनसि गुरूणीत्यनेन न्यायेन मासं पक्षे वा पापानुरूपेण षण्मासादिकालं वा। ब्रह्मचर्यादिनियमस्तु यथोक्तमपि भ्रूणहनं मासात्पुनस्त्यक्तरुः कृता इति॥

6 स्थूले वेषणया विकरेत्। स्थूले महापातके स्वेन आचरि[चर Ne]ते वेषणया तत्पापचिह्नं कुर्यात्। विकरेत् पृथिवीमाक्रमेत्। अन्ये वेषणां कुर्वन्तमाहुः। विकरणं विशसनं च॥ अवस्त्रो लोमवगाङ्गादो। वस्त्रविरहितः। लोमसहिता त्वक् आङ्गादो यस्य स लोमवगाङ्गादः। तदुक्तं चर्मणा येन संवृतः। एवं च सूत्रशेषो य एवं विकरेत्। अन्येन पुनरेव अस्य लोमवगाङ्गादो नग्न इत्यर्थः। एवमग्निमारोहेदित्याहुः। अन्यस्तु अवस्त्र इति वासःप्रतिषेधादुत्तरीयनिषेधः। लोमवगाङ्गाद इति लोममयं कुरुते। एवं लक्षण आङ्गादो यस्य स तथोक्तस्तेन को ऽर्थः। अथवा कामादुत्तरीयं कृतपं चर्मणा भवति। ततो यत्र गोचर्म विकितं चर्मणा तेन संवृत इति। तत्र चैवं भवति। अन्यत्र कामचारः॥ अग्निमारोहेत्। प्राश्येदात्मानमग्नौ भवति॥ संग्रामे वा घातयेत्। आत्मानमिति शेषः॥ अपि वाग्निमि[मि Mic]धानं तपसात्मानमुपयोजयेत। अपि वेति पूर्वस्माद्विलक्षणार्थो निपातसमुदायः। पूर्वे हि मरणान्तिकं। इदं तु जीवतः प्रायश्चित्यर्थम्। तपसेति प्रयोगात्तपश्चरेत्प्राणायामादि पञ्चतपादि वोच्यते। अग्निमिन्धा[मिधा Mic]नं समिद्भिः सायंप्रातरन्यत्र वा तीर्थादौ तपोयुक्तमात्मानं कुर्यादित्यर्थः। अन्ये त्वन्यथेदं सूत्रं वर्णयन्ति। यदि पूर्वे मरणान्तिकमिदं जीवन्नेव तपोयुक्तमात्मानं कुर्यात्। यत आत्मघातकस्य प्रत्यवायो दृष्टः। तस्मात्तप एव कुर्यात्प्रायश्चित्तार्थं। न पुनरग्निप्रवेशादिभिरात्मानं घातयेत्। अत एवापि वेति निपातसमुदाय एव एवं कुर्यान्नान्य इत्यर्थः॥

4.

1. वर्षासु ...°कुरुते। वर्षाग्रहणं भाद्रपदे श्रवणेन [°कृणं श्रावणे भाद्रपदे वा v. l.] यथा स्यादित्येवमर्थं कृतम्। तेन प्रथमातिक्रमकारणाभावात् श्रावण्यामेव युक्तमिति। अन्यस्तु प्रथमे श्रवणे अनध्यायनिमित्तं विद्युदादि भवति तदा द्वितीये ऽपि कुर्यादित्येवम्। न तु वर्षाग्रहणमुभयार्थं वा अन्यापेक्षं वा। तेन यदि प्रथमे श्रवणे अनध्यायनिमित्तं विद्युदादि भवति तदा नैव कुर्यात्॥ श्रवणेनेति तृतीयाधि-

कर्णे ' नक्षत्रे च लुपीति (Pāṇ. 2, 3, 45)। स्वशाखावध्यायश्च स्वाध्यायः। उपाकरणं प्रारम्भः। तेन वर्षाकाले श्रवणे नक्षत्रे स्वात्मीयां शाखामध्ययनार्थमुपाकुर्यादित्यर्थः। प्रकरणात्स्नातकम्[को v. l.]ध्यापयिष्यन्निति गम्यते। अन्तेवासिभिर्योगमिङ्नन्निति (su. 3) लिङ्गाच्च प्रथमाध्ययने वै ' तदा वारम्भणीयेष्टिस्तना न स्यात्। अभ्यासार्थं वा प्रतिप्रसङ्गात्। उपाकृते ऽध्ययने ब्रह्मयज्ञे चेति को दोष इत्यपरे। अन्यस्तु ब्रह्मयज्ञे न युक्तं ' विशिष्टनक्षत्रकालश्रवणादत एव न कार्यं। किंतु संवत्सरे संवत्सरे कर्तव्यं ज्योतिष्टोमवत्॥ स्वाध्यायानिति पूरणार्थं बहुवचनं ' वेदाभिप्रायं वा ' प्रपाठकाभिप्रायं वा। अथवा अन्तेवासिशब्दः सकृाध्यायिनोपलक्षयिष्यति ' समानाध्यायः स्वाध्यायः ' स्वाध्याये किं तैः सकृद्योग इष्यते। तस्मादन्तेवासिनः सकृाध्यायेनापि शक्यन्ते ऽवगन्तुम्॥

2. स नुक्रोति। य उपाकुरुते स नुक्रोति ' नाधर्युः। तत्र कर्म प्रदर्श्यते ' यद्युपाध्यायः उपाकर्म नुक्रोति तत्राग्निं [संप्राप्तिं v. l.] चाक्रः। शालाग्निकरणात्प्राग् जन्माग्नौ निर्मथ्ये वा जन्माद्यभावे स्यात्। अन्यस्तु जन्माग्नावेव तस्य नित्यत्वात्तदेव निर्मथ्यमुच्यते ' अरणिभ्यां मन्थनविधानाज्जातकर्मादौ (1, 17, 2)॥ अघा (? अघा B1c आघा M1c] नामासि तस्यास्ते ग्रैष्ट्रीय[ग्रैष्ट्रो v. l.]मिति ' अघो[(? अघो v. l.]नामासि तस्य ते ग्रैष्ट्रमिति। एभिर्मन्त्रैर्नुक्रोत्याध्यमनादशात् स्विष्टकृद्दर्शनादाध्यभागादि तत्रैव लभ्यते॥ यथालिङ्गमनुषङ्गः। यस्य यस्य लिङ्गं तत्तस्यानुषक्तति। सरस्वतीति स्त्रीलिङ्गात्तस्यास्त इति यनुषक्तति ' सरस्वानिति पुंलिङ्गात्तस्य त इति। एवमुत्तरत्र॥

3 ff. प्राक् स्विष्टकृतो ऽथ नपति। प्राक् स्विष्टकृतो नपतीत्येतावत्युक्ते सिद्धे प्राक् स्विष्टकृतो नपस्तत्किमथशब्देन। तत्रैके एतेनान्तेवासिनां योगमिङ्नन् प्राक् स्विष्टकृत इति सूत्रकृद्दर्शनाद्धाथशब्द इति मन्यन्ते ' ततो ऽथ नपतीति। अथानन्तरमन्तेवासिनोयोगकामकर्मादित्यर्थः। ततः स्विष्टकृतादि तन्त्रं समाप्यते। यद्वाथशब्दो ऽयमनध्येतव्यो ऽनर्थकत्वात्। यद्वाथशब्दो ऽङ्गव्युदासार्थः। तेन स्वाध्यायोत्सर्गे वक्ष्यति अथ नपति ऋतमवादिषमिति (su. 8)। तत्प्राक् स्विष्टकृतो न भवति ' नप एव केवलं इति स्थितिरयमेवार्थो व्याख्यान्॥

5. दर्भपाणिरित्यधीत इत्यनेन संबध्यते न नपतीत्यनेन काकातिगोलवद्वोभयेनेति [ऽभये वेति mss.] तत्पुनर्विचार्यं। पक्षो ऽर्धर्चशः सर्वामन्नेनेति (1, 22, 14) केचित्॥ त्रीक्षादितो ऽनुवाकान्। वेदादाविषे त्वेत्यादीनधीते (MS. I p. 1 ff) ' आचार्यो नपतीत्यर्थः। ब्रह्मचारी वाचार्याशक्तौ यथान्यायमभिव्याख्यातम्॥ को वो ... ऽध्यायान्। अध्यापयेत्तं मन्त्रं बहुवचनं ' उपाकर्मके ऽध्यायानिति स्थानानां व्याख्या। प्रथमस्थानमधर्यवकाः (MS. I p. 9 ff. u. 28 ff.)॥ उपतिष्ठन्तु ईदांसीति च ' नपतीति संबन्धः॥ स्विष्टकृद्[ता v. l.]दि मार्जनान्तम्॥ स्वयंकर्तृके ऽपि ब्रह्मणे दक्षिणा दीयते ' ब्रह्मन् क्रोष्यामी-

त्यामन्त्रणादेव प्राक् स्विष्टकृत इति लिङ्गात्। अन्यस्तु दर्शिणात्तेनैव भवति। कुतो ऽनित्यत्वा[त्वे v. l.]तो ऽपि प्रकृतिवत्प्राप्तिः। एतेन स्थालीपाकः स्थालीपाकेषु पूर्णपात्रविधानात् (2, 2, 28) अधरादिवदुपाकर्मतो दृश्यते। तदुक्तं नैमित्तिकत्वात्। स्वाध्यायाध्ययनं शिष्याध्यायसंबन्धितया निमित्तमुपाकर्म कोमस्य। स्वाध्यायसंस्कारः पुरुषसंस्कारद्वारकः स्वाध्यायानिति संस्कारनिर्देशात्। अतश्चायमपुक्तः समाचारो नोत्सृज्यत्ति उपाकर्मोत्सर्गेण भवितव्यम्। etc. ॥

6. तस्यानध्यायः। तस्याध्यापयितुरधीयानस्य वा ' एकस्यानध्याये सति इतरस्य सामर्थ्यात्। यद्वा तस्य वेदस्यानध्याय इति। कुत एतत् ' उपाकृत्योत्सृज्य चे[त्वे v. l.]ति (sū. 17) उपाकरणानन्तरं त्र्यहं पञ्चरात्रं (ib.) वानध्ययनं। ततश्चतुरहे षडहे वा वेदारम्भणं। ततः पञ्चहे सप्तहे वा कालः ' अ[ल:म Ne लम v. l.]नध्याया[य Ne]यने वारम्भः। तत उत्तरेणाध्यायाः ' तेषां सामर्थ्याद्वेदस्य न विद्यते ऽध्यायो ऽध्ययनं येषु ते ऽनध्यायाः कालास्तानाह ॥ समूहन्वातः। वायौ पांसु समूहति पांसुसंयुक्तवायौ वहति सतीत्यर्थः ॥ वलीकन्तारप्रभृति वर्ष। परलप्रान्तस्रावादारभ्यानध्यायो भवतीत्यर्थः ॥ न विद्योतमाने। यावद्विद्योतते तावदनध्यायः। न स्तनयतीति श्रुतिः। यावच्च स्तनयति तावदित्यर्थः। श्रुतिग्रहणमादरार्थम् ॥ आकालिकं ... शब्दाः। इतिहासप्रसिद्धा देवादीनां युद्धं त्रिगुणात्मकत्वाद्देवानां युद्धं तुमुलं भाव्यते। अहर्युद्धं वा ज्योतिःशास्त्रे प्रसिद्धा देवतुमु[मू v. l.]लं स्यात्। आकालिकं द्वितीये ऽह्नि तात्कालिकं यावत्। विद्युदुन्वो[त्वो Ne]ल्का महोल्केत्यर्थः। धन्वेति पाठे इन्द्रधनुर्दर्शने। उल्का महोल्का सूक्ष्माणा अवर्त्तनीयत्वात्। अत्यन्तरा: शब्दाः ' अतिक्रान्तान्तरा ये गोमायुरुतादयः। सामधनिरपि यो ऽन्तराणयतिक्रम्य वर्तते ॥ आचारेणान्ये। आचारो यदि समाचारस्तदा रथ्यादौ वृषलसंनिधानादौ चानध्यायो न स्यात्। तस्मादाचारेणाचाराभिधायकेन मन्वादिना ऽन्ये ऽनध्याया अभिहिताः ' ते ततो ऽवगन्तव्या इत्यर्थः ॥

7. अर्ध°..°ञति। अर्धपञ्चमाः ' अर्धपञ्चमस्य येषां मासानां अर्धपञ्चमाः ॥ अधीत्य ब्रह्मचारी ' इतरथा अधीत्योति ब्रूयात् ॥ उत्सृजति। कति दिवसान्नाधीयीत इत्यर्थः ' न पुनः स्वाध्यायमुत्सृजेत् ' तदुत्तरत्रानध्ययनविधानात्। अन्यस्तु उत्सर्गसंज्ञं कर्म करोति। तदुपरिष्टाद्वक्ष्यति। तथा च स्मृत्यन्तरं पौषमासस्य रोहिण्यामष्टकायामथापि वा ब्रह्मचारी छन्दसां कुर्यादुत्सर्गं विधिवद्बहिरिति। ततो ऽर्धात् गृहे उपाकर्म कर्तव्यम् ॥ पंचार्धषष्ठान्। पञ्च मासानित्यर्थः। तथार्धं षष्ठस्यं मासस्य येषां ते ऽर्धषष्ठाः। अधीत्योत्सृजतीति संबन्धः। मासेषु तुल्यो विकल्पो ' न तु कृतार्थतयेति ॥

8 ff. उत्सर्गमाह ॥ अथ जपति। स इति कृते कर्मणि प्राक् स्विष्टकृत इति (sū. 4) एतं मन्त्रं जपति। त्र्यहं पञ्चरात्रं वानध्यायस्तदनन्तरं शिथिलं स्वाध्यायः प्रवर्तते ' वेदाङ्गानां सकाध्ययनात् ॥

10. उत्सर्गोत्तरकाले ऽनध्यायानाह ॥ प्रतिपदं ... नाधीयीत। प्रतिपदं रात्रीमुभयतो वांसरात्रं पठेत्। अत्यन्तसंयोगे द्वितीया ॥ नात ऊर्ध्वमध्येषु सत्सु नाधीयीत । एतच्च द्योतरावरणोषध्येषु द्रष्टव्यं स्मृत्यन्तरात् । अतऊर्ध्वमकरणे समाप्तपाठादेवोत्सर्गाद्ऊर्ध्वं स्यात्। तस्मादतः पर्वण्याः प्रतिपदात्रेः। ऊर्ध्वमित्येवमर्थे वक्तव्यं ' तेन न सर्वा काचित्प्रतिपद्दूष्यते। तस्मादाद्यप्रतिपद्दूष्यते ॥

11. आकालिको . . । अयमाकालिकार्थ आरम्भः ' तेन वलोकनात्सर्वर्षे स्यान्न कतिपयबिन्दुमात्रे ॥

12. गोनामेषु दिवाधीयीतेत्यतं सूत्रं। गोनामेष्विति क्रान्दसः समासान्तः। तेषु यन्मन्त्रब्राह्मणकल्पं तद्दिवाधीयीतेत्यर्थः। मन्त्रो वसोयस्येर्क्षाति (MS. IV, 26, 13)। ब्राह्मणं प्रजापतिर्वा (ib. 20, 13) इत्यादि। कल्पाश्चातुर्होत्रा गोनामिकमित्यादि (Mān. Çr. 5, 2, 14; 9, 5, 1 wo vgl. चातुर्होतृकगोनामिकमप्यनाहिताग्नेर्द्वादशरात्रं त्रिरात्रमेकरात्रं वा पाकयज्ञोपचारादग्निमुपचरति; cf. MS. I p. 131 ff.; IV p. 20 ff.) ॥ पितृमेधे मन्त्रब्राह्मणकल्पे। मन्त्रमत्र पितर इत्यादि (MS. I, 142, 10 ff., 155, 3 ff.)। ब्राह्मणमित्युशलाकाग्न्यनुवाकत्रयं (MS. I, 157, 8 ff.)। कल्पश्च प्राग्दक्षिणाचाराः पितृयज्ञ इत्यादि (Mān. Çr. 1, 1, 2 . 7, 6)। पितृमेधश्चायं षट्पालेन (cf. MS. I, 157, 1) पितृयागः ॥ महाव्रतं । आयाकिकं (MS. II, 158, 8) महाव्रतमुपदधात्यादि कल्पः (Mān. Çr. 6, 2, 3)। यवा यवया (MS. II, 162, 6) इत्यस्मात्। प्राक् महाव्रतं पंचदिति (?) च ब्राह्मणं शाखान्तरे महाव्रतकर्मनामधेयत्वात् मन्त्राणां नामधेयत्वाच्च। अविशेषेण निर्देशादेवं व्याख्यातम् ॥ अष्टापदी । ब्राह्मणमधेयाष्टापदीति। कल्पो ऽष्टापदी स्यादिति ॥ वैषुवतं ब्राह्मणं शाकलं कल्पश्चैकाविंशो ऽग्निष्टोम इत्यादि। विषुवत्[त Mic] इत्यस्मात् ' प्राक् महाव्रताष्टापदी। वैषुवतानीति समासपाठः ॥ वैषुवतमार्द्रपाणिः ' अधीयीतेति शेषः। विषुवान्नाम क्रतुः। तस्य मन्त्रब्राह्मणेषु वैषुवतमार्द्रपाणिरधीयीतेत्यर्थः। कल्पे ऽपि स्वर उदात्तादिरस्ति ॥

13. रुद्राञ्च etc. । रुद्राणां मन्त्रा अष्टावनुवाकस्थाने (cf. MS. II, 120, 16 ff.)। ब्राह्मणं रुद्रं वै देवा यज्ञादनन्तरं पत्नित्यादि । कल्पः तस्यां श्रोणाविति गवेधुकान्तः (Mān. Çr. 11, 7, 1 ff.) ' यदि रुद्रैर्भातीति च ॥

14. शुक्रियं च। न नक्तं न भुक्त्वा न ग्राम इति चशब्दः (Mān. Çr. 4, 8)। गायत्रीमित्यादि पञ्च च विंशतिरनुवाकमन्त्राः। कल्पो ऽयातः प्रवर्ग्येत्यादि (Mān. Çr. 4, 1)। शाखान्तरे ब्राह्मणं। प्रवर्ग्यकल्पे नियमो व्याख्यातः। स्वाध्यायमध्येष्यमाण इत्यत्र (Mān. Çr. 4, 8) दिक्कालादिनियमो व्याख्यातः। नियमशब्दो व्रते ऽपि ' आरण्यं (ib.) वर्तते ॥ त्रयोविंशं तु संगील्य ' अधीयीतेति संबन्धः। त्रयोविंशं शुक्रियानुवाक[कं Nc]प्रकरणं संगील्यादिणी इति गम्यते। तुशब्दो विशेषणार्थः ' शुक्रियनियमादधिको ऽस्य नियमविशेषो ऽयम् ॥

15. गवां तु न सकाशे गोनामानि । पूर्वसूत्रवदिदमपि व्याख्येयं । गोनामानीति मन्त्रसमाख्याने तु गोनामान्येव काम्येत्यादीनि (cf. Mān. Çr. 9, 4, 1 ; Gobh. 3, 8, 3 u. a.) ' सामान्योपदेशाद्विज्ञे[? ज्ञे v. l.] विज्ञेय [ज्ञेये Nc] इत्यादीनि च ॥ गर्भिणीनामसकाशे ऽष्टापदी । अष्टापदो संज्ञा । गर्भिणी पशुः प्रवृद्धगर्भादिश्चतुर्भिस्तस्या अभिधायकं ब्राह्मणमष्टापदोत्युपचर्यते । असकाशे नामाधीयीतेति । नायं विधिः सन्निधानमसकाशे ऽध्वाध्ययनस्य ' तस्मात्तत्सकाशे ऽष्टापदीमधीयीतेति ॥ रेतो मूत्रमिति च । चकारो असकाश इत्यनुकर्षणार्थः । तेन रेतोमूत्रसकाशे नाधीते इत्यर्थः । उपलक्षणार्थं च सर्वाशुचीनां पुरीषादीनाम् ॥

16. शुनासीर्यस्य सैर्ये चतुःकामस्य चतुर्नो धेक्षोत्यारभ्य दिवाधीयीतेत्यतं सूत्रं । इतरथा आर्द्रपाणिरधीयीतेत्यनुवर्तते ' ततश्चार्द्रपाणेरध्ययनं प्राप्नोति । शुनासीर्यदेवत्ये द्वे ऋचौ सप्त वा (MS. IV, 158, 10) तरणिरु (ib. 12) इति । चतुःकामस्य चकारस्यैके इत्यनुकर्षणार्थः । अग्नये क्षात्रस्वते ऽष्टाकपालमिति (cf. Mān. Çr. 8, 7 ; TS. 2, 3, 8, 1) त्रिरु[त्रिःरु Nc]विश्चतुःकामस्य तत्र सैर्ये याज्यानुवाक्ये तत्सूर्यस्य (MS. IV, 147, 1) भद्रा अग्ना (ib. 3) इति च प्रातरग्निहोत्राभ्युदितेष्वां पठ्यते [पठयते Nc = पठ्यते ?] ' इरु वाक्ययोः ऋचोः अधीतत्वात् । अन्ये पुनश्चतुःकामस्येति विशेषणं चतुर्नो धेक्षोत्यस्या इक्षन्ति । तदयुक्तं । तस्याश्चतुर्नो धेहि चतुष इति (MS. IV, 190, 13) स्वरूपनिर्देशात् विशेषणमनर्थकं ' सुसंदृशं वा वर्यमित्यर्थ इति (ib. 15) । सूर्य[र्ये NcBlc] इति विशेषानुवृत्तेः सूर्यो आपो ऽवा[वा v. l.]गाकृत इति च याज्योपादानमनुवाक्या[क्ये v. l.]निवृत्त्यर्थम् ॥ सूर्य आदित्ययाम्यानीति कानीत्याह ' षड्चानीति ' एवं च सौम्यादीनां रात्रावपि निषेधः । अथवा सौर्यादित्ययाम्यानि ब्राह्मणानि नपुंसलिङ्गनिर्देशात् सामान्यापेक्षं वा नपुंसकत्वम् ॥

17.ff. उपाकृत्योत्सृज्य स व्यरुं नाधीयीतेति वर्तते । पंचरात्रमेके विकल्पार्थं वचनम् ॥ वेदारंभणे समाप्तौ चाकालं । वेदारम्भो वेदाध्यनुवाकः ' वेदसमाप्तिः वेदान्तानुवाकः ' इषे त्वा (MS. I, 1, 1) अग्नेर्मन्वे (III, 190, 6) च । आकालं ' कालादारभ्य यावद्द्वितीये ऽह्नि तत्कालमित्यर्थः । एतयोः प्रत्यारम्भसमाप्तिशब्दयोरयमेवार्थः । न मध्ये उपरि वा वेदं आरभ्य पश्चादादिः पठितव्य इति वेदं वापि यथाक्रममित्येतदनुवचनात् ॥

5.

1. अथातोत्तर[तोत्तर Blc तोतर Mlc]कल्पं व्याख्यास्यामः । अथशब्दो विशेषाधिकारार्थः । स्वाध्यायधर्मप्रकरणे अनध्याया गवां तु न सकाश (1, 4, 15) इत्यादयश्चानध्याया व्याख्याताः । अत्तरकल्पज्ञानादिति कर्तव्यता व्याख्याता । अत्तरकल्पस्तु बहुभिः कर्तव्यतया युक्तत्वात् पूर्ववत्स्वाध्यायकर्मणः

सकाशात् विशिष्टतम इतिकर्तव्यतावच्छेदविशेषणतो ऽधिक्रियते । अधिकृतस्य कृतिकर्तव्यता-संबन्धः । अन्तरे अन्तराले रात्रिसूयस्थाग्निष्टलाज्योः कल्पधर्म इति अन्तरकल्पवचनाच्चकर्मणो नामधेयं रात्रिसूयाध्यायसमाप्तिनिमित्तं नैतदस्ति प्रवृत्तिनिमित्तं चान्तरशब्द उभयोपपत्तेत्वात् ॥ व्याख्यास्याम इति गौरवेण श्रेयस्करत्वमव्ययनित्यशब्देन ऽव्ययस्य सूचयति । अथवा अवबुद्धवेदार्थो गुरुणानुज्ञातः काश्चित्स्वान्गृहान्प्रस्थितः शब्दविद्यामधीयानैः पथि संगतस्तस्यैतैः सह किंचिदवं वाद् यानात् । (etc. excuse, dann) प्रकृतमभिधीयते (cf. am ende zu 1, 16, 1—4 u. 1, 23) । अन्तरकल्प इति को ऽर्थः । "उपकारणात्परतरं भवति । तदर्वाक् न भवतीत्यर्थः । अत एवायातःशब्दो कृतौ ॥

2—4. दर्भमयं बासः परिधापयेत्यादि नियमार्थं वचनम् ॥ याचनं स्मृतिगर्हितम् ॥ अपां नप्तृ इत्यनुवाको (MS. II, 72, 8 ff) गृह्यते । कल्पस्य सत्त्वात् वचनाय कपिञ्जलानियोगवत् (MS. III, 172, 7) । एतदेवेतिकामस्य मूलं मन्यामहे । अपां नप्तृ इत्यनुवाकमपि जप्त्वा[त्रपित्वा ? L.] वेदव्रतफलेन युज्यत इति । नूनमेतदग्निप्रवेशप्रतिज्ञाने कारणम् । अतो ऽनुवाको जप्तव्यो । ऽनुवाकान्ति कि शुल्कशब्दः (MS. II, 73, 6) । व्याकृतिशब्दात्सतः किल शब्दान्तरोच्चारेण विनापां नप्तृ इति जपयज्ञफलस्तेन ऊर्जो नप्तृ इति (ib. 72, 8) नप्त्वान् जपन् दर्भसमूहानुत्तरस्यादिना पूर्वार्धं जानीयात् (nach Man. Gr. 1, 1, 1) ॥ तीरे तीर्थे उदकतमपि य[य्या Ne]षो ऽवगाह्य मज्ज्यात् (? verdorbene stelle) ॥ यो भूर . . सावित्रोमधीत इति व्याख्यातं "त्रीञ्शादितो ऽनुवाकान्" अधीत इति प्रकृतेन संबन्धः ॥ आपो देवी रात्रौ नित्यहो । आपो देवीरित्यादयो ऽष्टावनुवाकाः । अनुवाकादिप्रतीकत्वादनुवाकाधिकाराश्च ॥

5 ff. या ओषधय इत्यादि ओषधीनत्र इत्यन्तं । एते चत्वारो ऽनुवाकाः ॥ स शेवधम् . . इति तिस्रस्तज्[द् Mic त Ne]शस्[शं Ne]योरावृणीमहे इति नार्षेयब्राह्मणाच्छंसिपितृधर्मेण तर्पयेति । द्वादशानुवाकाश्चाध्येतव्या अपि । अधीत इति प्रकृतसंबन्धात् । स एताभिः पञ्चभिर्मन्त्रैर्मार्गं कृत्वा तत आचार्यशब्दितृधर्मेण तर्पयेयुरित्यर्थः । आचार्यशब्दो मन्त्रादिभिः मैत्रन्धिशब्दवेन स्मृतः । "उपनीय तु यः शिष्यमित्यादौ (Manu 2, 140) सूत्रकारभाष्यकाराद्याचार्याः । पितृवत्तर्पणमस्य तृप्यध्वं तस्मै ते स्वधेति चोदकाल्लौन्द्युः । पितृतीर्थेन प्राचीनावीतिनो ऽ]तिनः (wie Ne ? auch Man. Gr. 1, 1, 2) । तर्पयन्तीति बहुवचनमत्रेवासिभिः सकृदधिकारार्थम् । दर्भपाणिस्त्रिः सावित्रीमधीत इत्येकवचनात्पृथगध्यधिकारो गम्यते ॥

7. आद्धकल्पेन शेषो व्याख्यातः । शेष आचार्यतर्पणस्यांशभूतो विधिना आद्धकल्पेन आद्धनाधिकृत्योक्तेन अनुगुप्तमन्त्रमित्यादिना (2, 9, 9 ff.) पितृदानं च आचार्याणामेककस्य तर्पणवदेकोद्दिष्टविधानं च । ऐतिकासिकत्वान्तरशब्दव्युत्पत्ती अन्तरश्चैकोद्दिष्टविधानेनेति । प्राप्तमेतत् । परमार्थतस्तु ब्राह्मणभोजनमेव । . . . पिण्डनिधानं विधाय तान्तच्छेषो ब्राह्मणभोजनं आद्धकल्पेनेति दृष्टवान् ॥

1. यथातो ऽग्निं प्रवर्तयेति । यथेत्यानन्तर्ये । यत्तरकालत्वादनन्तरम् । यत इति तद्धेतुकमग्निप्रवर्तनम् । एतदेव मूलं यदध्येतारो ऽधीयतसूत्रं d. mss.]के समाप्ते ऽनन्तरमेवाग्निप्रवमाननुवाकानारभन्ते । न गोदोहनमवधिरत्रेति ... ॥

2. उत्तरतो .. वेद्याकृतिं कृत्वा । स्थण्डिलमग्निं प्रवर्तयतीत्यर्थः । उत्तरस्मिन्देशे पूर्वस्मिन्वा शुचौ वेद्याकृतिं दर्शिन्या(?) सदृशीं वेदादिसंस्कारवर्जितां कृत्वा अग्निप्रवर्तनं कुर्यादित्यर्थः॥ आकृवनीयस्थाने प्राग्देशे वेद्या आकृवनीयसदृशदेशे चतुरस्रमायतनं कृत्वा । तत्र छन्दांसि गायत्र्यादीनि क्रमत्यक्तान्यन्तरवृद्धिक्रमेण प्रतिष्ठाप्य। कथं । विष्टरान् दर्भगुष्टीन् कृत्वा स्वतश्छन्दसां प्रतिष्ठानामक्तामाव(? नामभा v. l.)-संज्ञकैः शब्दैर्विष्टरान् दर्भगुष्टीन् कल्पयित्वा स्थापयेत्। विष्टरदर्भपुञ्जस्याकारकृतो विशेषः॥ दक्षिणाग्निस्थाने प्रौगाकृतिं कौसि[शि v. l.]तं स्थाप्य । प्रौगा[गस्या Nc]कृतिं प्राञ्चुत्पशकटाकारं । छन्दस्य कौसि-[शि Mic]त इति संज्ञा कौसितान्मार्जयेवेति (sc. 4) व्यवहारार्थं । यत्र छन्दे कुसीता[त mss.]यो राक्षसी वामदेवस्तुतेनाध्यानेनाग्निना प्रवेशितेति कृत्वा कौसितो छन्दः [उच्यते । पश्चादुत्करं कृत्वेत्यध्याहारः । पालिरूत्करः पश्चात्कौशित इति छन्दः॥ erganzen Mic Bie]॥ अपां पूरयित्वाद्भिः सर्वत्र पूरयेयुरित्यर्थः॥ गार्हपत्यस्थाने पश्चात्तस्या वेदेर्गार्हपत्यसदृशमायतनं कृत्वाग्निं प्रस्थाप्य । अन्वाग्निं चोपासनं वा प्रस्थाप्योदीच्य नासिक्यौ पुंसानः प्रथमं मन इत्यादयः पञ्चदशाध्याकृतीर्जुहुयात् । सर्वत्रानादेशे आद्यमेव ज्ञातव्यम् । स्विष्टकृद्दर्शनादाद्यमागादित्यत्वसुवाद्यत्वाच्च[श्च d. mss.] प्रधानस्थाने ऽत्र स्रुव एव भवति । तथोपरिष्टाद्धव्यानः ॥

3. यज्ञियानां समिधां स्वाकाराभिराधा[धा v. l.]ति । ततः समित्पूलांस्त्रीस्त्रीन्यज्ञियानुपकल्प्य । पश्चादग्नेस्विष्टकृतः प्राक् स्विष्टकृतस्तु आदधति [दधाति: v. l.] स्थण्डिल[ण्डित v. l.]स्याग्निस्थानस्यादितस्त्रिभिरनुवाकैः अनुवाकमूलैर्यथासंख्यं । वीप्सावचनमेकस्य पू[मू v. l.]लार्थं व्याकृतिपूर्वमनुवाकत्रयस्य चाकृतित्रयेण यथासंख्यं उत समस्ताभिरिति । यथासंख्यं व्याकृतिपूर्वमित्येकवचनात्॥

4. आपोकिष्ठायेति स्वस्ति वाचयि[य Mic]ति । आपोकिष्ठायेर्मा[येतिमा v. l.]र्जनं । तत्प्रपत्ते विचारणीयम् । अनुवादः कौसि[शि v. l.]तोदकि[के v. l.]विबोधनार्थः । स्यान्मार्जनस्य । अन्यस्तु कौसि[शि v. l.]तानिति तस्यैव मार्जनम् । उदकस्योद्धारः । अत एव आकृवनीयस्थाने छन्दोर्था दर्भगुष्टयो विष्टरा वा ते ऽपि प्रवक्तिव्याः॥ धानाभिरिति नियमः॥ ब्राह्मणान् त्रिप्रभृतीन्वा॥ स्वस्तिवाच्योदकपूर्वमेकैकस्मै

ब्राह्मणाय धाना दद्युः। पूर्ववदत्र सङ्काधिकारो वाचयतीति वचनात्। तथाग्निं प्रवर्तयतीति बह्वृचोपक्रमात् सर्वेऽपि तिष्ठन्त आदधतीति। बह्वृचं न ब्रह्माण्यपेक्षन्तीति।(etc. excurs.)।अथ किमर्थं मार्गवासा इत्यादि(1, 1, 2)धर्मगणमध्ये स्वाध्यायोपाकरणादयो ऽग्निप्रवर्तनान्ता अध्ययनधर्मेण उच्यन्ते। तत्र पाठे श्रुतेषु ब्रह्मचारिण एवाधिकारः स्यात्। इह त्वनारभ्य पाठात्सर्वेषामधिकारः सिद्धः। तस्मादन्यार्थे अध्ययने गोनामादिधर्मवदत्रकर्त्याग्निप्रवर्तनकर्मणी स्याताम्। तेनैकः कुर्यात्तन्नाश्यादौ यथाधिकारं यजमान एव समेत्य समित्पूलांस्तिष्ठन्नादध्यात्स्रुक्त्रिक्। एष विधिः प्रयोक्तृणाम्। प्रयोगधर्मत्वेन बह्वृचं प्रवर्तयतीति वाचयतीति। एवं मध्ये ऽपि तिष्ठन्त आदधतीति बह्वृचवचनं। न तु ब्रह्माधर्त्वपेक्षम्॥

7

